तथा ज्योतिषस्याङ्गानि नानाविधानि तत्र प्राधान्यात् त्रिविधानि यथोक्तं वराहसंहितायाम् । "ज्योतिःशास्त्रमनेकभेदविषयं स्कन्धत्रयाधिष्ठितम् तत्कात्स्न्र्योपनयस्य नाम मुनिभिः सङ्कीर्त्यते संहिता । स्कन्धेऽस्मिन् गणितेन या ग्रहगतिस्तन्त्राभिधानन्त्वसौ होरान्योऽङ्गविनिश्चयश्च कथितः स्कन्धस्तृतीयोऽपरः" इति ।

नरपतिजयचर्य्यायान्तु षड्विधान्याङ्गानि समासेनोक्त्वा तेषां विस्तारो दर्शितो यथा

"स्वरचक्राणि चक्राणि भूबलानि बलानि च । ज्योतिषं शकुनञ्चैव षडङ्गान्यत्र वच्म्यहम् ॥ यामलेषु च सर्व्वेषु यान्युक्तानि स्वरोदये । विंशतिःस्वरचक्राणि तन्नामानि वदाम्यहम् । मात्रावर्णौ ग्रहोजीवो राशिभं पिण्डयोगकौ । द्वादशाब्दोद्भवञ्चक्रं वर्षायनर्त्तुमासकम् ॥ पक्षाहं नाडिकं चक्रन्तिथिवारर्क्षयोगकम् । तत्कालेन्दुफलञ्चाष्टस्वरन्देहोद्भवन्तथा ॥ (इति स्वरचक्रनामानि) । पूर्व्वमुक्तेषु शास्त्रेषु मया ज्ञातानि यानि च चतुरशीतिश्चक्राणि तेषां नामानि वच्म्यहम् ॥ एकाशीतिपदञ्चक्रं शतपत्रं नवांशकम् । छत्रं सिंहासनं चक्रं कूर्म्मं पञ्चविधात्मकम् ॥ भूदेशं नगरं क्षेत्रं गृहकूर्मञ्च पञ्चकम् । पद्मचक्रं फणीशाख्यं राहुकालानलन्त्रिधा ॥ सूर्य्यकालानलं चक्रं चन्द्रकालानलन्तथा । घोरकालानलं प्रोक्तं गूढकालानलं बलम् ॥ राशिसूर्य्यसमायोगे चक्रं कालानलं मतम् । संघट्टकं सप्त ज्ञेयं सप्त कालानलानि च ॥ तिथिवारञ्च नक्षत्रं त्रिधा चैव कुलाकुलम् । कुम्भचक्रं द्विधा प्रोक्तं राशिनक्षत्रसम्भवम् ॥ प्रस्तारञ्चक्रवेधाख्यैः प्रभेदैस्तु चरन्द्विधा । भूचरं खेचरं, याम्यं नाडीचक्रं त्रिधा मतम् ॥ कालचक्रं फणिद्वन्द्वं सूर्य्याख्यं चन्द्रजन्तथा । कविचक्रं द्विधा प्रोक्तं स्थानस्वाम्यृक्षपूर्व्वकम् ॥ खलकाख्यं द्विधा चैव कृत्तिकास्थानभादिकम् । कोटचक्राष्टकं प्रोक्तञ्चतुरस्रादिभेदतः ॥ गजमश्वं रथं व्यूहं कुन्तं खड्गं छुरीन्धनुः । सौरिं सेवां नरंपिण्डम्भम्पत्रिमार्गायष्टम्बिकम् ॥ सप्तरेखोद्भवञ्चक्रं पञ्चरेखेन्दुभास्करम् । त्रिविधं मात्रिकाचक्रं विजयं श्येनतोरणम् ॥ अहिलाङ्गलबीजोप्तिवर्षाख्यं सप्तनाडिकम् । चक्रं सांवत्सरञ्चैव स्थानचक्रं तथैव च ॥ एतानि सर्व्वचक्राणि ज्ञात्वा युद्धं समाचरेत् । जयेदिह न सन्देहो शक्रतुल्योऽपि भूभुजि ॥ (इति चक्रनामानि) । स्वरोदयैश्च चक्रैश्च शत्रुयत्र समोऽधिकः । तत्र युद्धे बलं ज्ञेयं भूबलैर्विजयार्थिनाम् ॥ तेषां नामान्यहं वक्ष्ये ख्यातानां ब्रह्मयामले चतुरशीतिसंख्यानां यद्बलेन जयी रणे ॥ उड्डी जालन्धरी पूर्णा कामकीलैकवीरका । शिलिन्ध्री च महामारी क्षेत्रपाली च वंशजा ॥ रुद्रकालानला काली कालरेखा निरामया । जयलक्ष्मीर्महालक्ष्मीर्जया विजयभैरवी ॥ बाली योगेश्वरी चण्डी जानुबन्धककर्त्तरी । शार्दूली सिंहली तन्वी महामाया महेश्वरी ॥ देवकोटी शिवा शक्ती धूम्रवाणा वराटिका । त्रिमुण्डा मल्लरी धर्म्माऽमृताष्टाऽक्षया जया ॥ दुर्मती प्रवरा गौरी काली नरहरी बला । खेचरी भूचरी गुह्या द्वादशी विष्टिकेश्वला ॥ त्रैलोक्यविजया शौरी कराली वड़वापरा । रौद्री च शिशुमातङ्गी अभेद्या दहनी मता ॥ बज्रबला बर्गभूमी कपाली चानिलानला । चन्द्रार्कबिम्बभूमी च ग्रहभूराशिलग्नगा ॥ राहुकाला नलीभूमी स्वरभूमि र्द्विधा मता । रुद्रस्त्रिमासिकश्चैव राहुचाष्टविधस्तथा ॥ चन्द्रः सप्तविधः सूर्य्यश्चतुर्द्धा योगिनी त्रिधा । कालबलन्त्रिभेदञ्च तिथिनक्षत्रवारजम् ॥ इमानि भूबलान्यत्र ज्ञात्वा यः प्रविशेद्रणे । अरयस्तस्य नश्यन्ति मेघा वातहता यथा ॥ (इति भूबलानि) । शत्रोः समाधिके नाम्नि स्वरैश्चक्रैश्च भूबलैः । स्थानसेनाधिके शत्रौबलविज्ञानसंयुते ॥ अभङ्गे चाप्यभेदे च दुःसाध्ये दुर्जयेरिपौ । जयोपायमहं वक्ष्ये मन्त्रयन्त्रादिकं बलम् ॥ रणाभिषेचनं दीक्षा रणार्च्चा रणकङ्कणम् । बीरपट्टं रणपट्टं जयपट्टस्य बन्धनम् ॥ मेखलाकवचं न्यासं मुद्रारक्षां च कङ्कणम् । औषधन्तिलकं घण्टागुटिकां च कपर्द्दिकाम् ॥ योगेघटितशस्त्राणि शस्त्ररक्षाय मोहनम् । शस्त्रलेपांश्च विविधान् वाणानाम्पिच्छबन्धनम् ॥ शम्बलङ्काहलढक्कां मुरजन्मन्त्रधारणम् । मारणं मोहनं स्तम्भविद्वेषोच्चाटनं वशम् ॥ पताकापिच्छकं यन्त्रात्परविद्याविनाशनम् । शान्तिकं निजसैन्यस्य सर्व्वोपद्रवनाशनम् ॥ बलान्येतानि योज्ञात्वा संग्रामं कुरुते नृपः । असाध्यस्तस्य नैवास्ति शत्रुःको पि महीतले ॥ (बलाबलनामानि) । गणितं व्यवहारञ्च होराज्ञानं परिस्फुटम् । त्रिस्कन्धं ज्योतिषं वक्ष्ये जयचर्य्यां स्वरोदये ॥ खेचरानयनं स्पष्टं पञ्चाङ्गं तिथिसाधनम् । उदयास्तमनञ्चक्रक्रान्तिं वक्ष्ये यथामति ॥ नतोन्नतप्रमाणञ्च भावसन्धिप्रसाधनम् । ग्रहाणां षड्बलं वक्ष्ये राशिभावबलान्वितम् ॥ राशिसंज्ञाप्रभेदञ्च खेचराणां तथैव च । नृणां जन्मफलं वक्ष्ये ऋक्षराश्यंशलग्नजम् ॥ फलञ्चन्द्रार्कयोगानां ग्रहाणां स्वोच्चनीचकम् । आयुर्द्दायं दशाश्चैव तासाङ्कालप्रवेशनम् ॥ तत्कालग्नं ग्रहान् स्पष्टान् दशान्तर्द्दशयोः